**संस्कृतवार्ता:**

**दिनाङ्क :-27.08.2024**

**प्रात: - 06:55**

**<u>अथ वार्ताः</u>**

**प्रधानमन्त्री-अमरीकाराष्ट्रपति:**

**प्रधानमन्त्री नरेन्द्र मोदी ह्य: अमरीकादेशीयेन राष्ट्रपतिना जोबाइडेनइत्यमुना साकं सम्वादं कृतवान्। अपि च यूक्रेनदेशस्य स्थितिं समेत्य क्षेत्रीय-वैश्विक-प्रसङ्गेषु चर्चा जाता। वार्तालापेयं दूरभाषमाध्यमेन जातास्ति। प्रधानमन्त्री भारत-अमेरिकादेशयो: व्यापकं वैश्विक-रणनीतिक-सहभागित्वं प्रति राष्ट्रपते: जो. बाइडेनस्य गहनप्रतिबद्धतायै प्रशंसां कृतवान् यत् लोकतन्त्रस्य विधे: जनानां मध्ये च सुदृढसम्बन्धानां पारस्पारिकमूल्येषु अश्रितमस्ति इति। उभौ नेतारौ द्विपक्षीय-सम्बन्धनाम् अन्तर्गतं महत्वपूर्ण प्रगतेरपि समीक्षां कृतवन्तौ। तदनन्तरं अनेकेषु प्रसङ्गेष्वपि विचाराणाम् आदानप्रदानं जातम्।**

**भारत-सिंगापुर/वृतीयसम्मलनम्**

**द्वितीयं भारत-सिंगापुर मन्त्रिस्तरीयं वर्तुलाकारमञ्चसम्मेलमं ह्य: सिंगापुरे समनुष्ठितम्। उभौ पक्षौ आई. एस. एम. आर. इत्यस्य अन्तर्गतं अभिज्ञातेषु षड्स्तम्भेषु विचार-विमर्शं कृतवन्तौ। येषु उन्नत विनिर्माणं सम्पर्कसौविध्यं च सम्मिलिते स्त:। उपवेशने विदेशमन्त्री एस. जयशंकर:, वित्तमन्त्री निर्मला सीतारामन्, सूचना-प्रसारण-मन्त्री अश्विनीवैष्णव:, वाणिज्योद्योगमन्त्री पीयूषगोयलश्च सम्मिलिता: अभवन्। सिंगापुरस्य प्रतिनिधिमण्डलस्य नेतृत्वं सिंगापुरस्य प्रधानमन्त्री गेन किमयोंग-कृतवान्। केन्द्रीय मन्त्रिभि: भारत-सिंगापुर-मन्त्रिस्तरीये वर्तुलाकारमञ्चसम्मेलने सिंगापुरस्य प्रधानमन्त्रिण: वोंग-वर्यस्य निरन्तरं कृताया: सहभागिताया: प्रशंसापि कृता।**

**लद्दाखे पञ्च नूतनानि जनपदानि**

**केन्द्रसर्वकारेण लद्दाखस्य केन्द्रशासने पञ्च नूतनानि जनपदानि - ज़नस्कर, द्रास, शाम, नुब्रा, चांगथाङ्ग च निर्मातुं निर्णयः कृतः अस्ति। प्रधानमन्त्री नरेन्द्रमोदी इत्यस्य विकसितस्य समृद्धस्य च लद्दाखस्य निर्माणस्य दृष्टिः अग्रे नीत्वा केन्द्रीयगृहमन्त्री अमितशाहः ह्यः एकस्मिन् सन्देशे उक्तवान् यत् केन्द्रीयक्षेत्रे पञ्च नूतनानि जनपदानि निर्मातुं निर्णयः कृतः अस्ति। सः अवदत् यत् लद्दाख-नगरस्य जनानां कृते प्रचुर-अवकाशान् प्रदातुं सर्वकारः प्रतिबद्धः अस्ति।**

**माओवादिना:**

**छत्तीसगढस्य बीजापुरजनपदे ह्य: पञ्चविंशति: माओवादिन: आत्मसमर्पणं कृतवन्त:। एते माओवादिन: जनपदस्य आरक्षि-अधीक्षकस्य सी.आर.एफ. इत्याख्यस्य बलस्य उप-महानिरीक्षकस्य च पुरत: समर्पणं कृतवन्त:। अवधेयं वर्तते यत् एतेभ्य: माओवादिभ्य: आहत्य नवविंशति-लक्षरूप्यकाणां राशि: घोषतो वर्तते। आरक्षि-अधीक्षकेण ख्यापितं यत् छत्तीसगढ़-प्रशासनस्य पुनर्वास-नीत्या: अन्तर्गतं पचविंशतिसहस्र-रूप्यकाणि प्रदास्यन्ते।**

**चम्पईसोरेन-भाजपेतिदलम्**

**झारखण्डस्य पूर्वमुख्यमन्त्री झारखण्ड-मुक्ति मोर्चा-दलस्य च वरिष्ठनेता चम्पईसोरेन: अस्य मासस्य त्रिंशद्दिनांङ्के रांचीनगरे भारतीयजनतापार्टीतिदले सम्मिलितो भविष्यति। अस्या: वार्ताया: घोषणा असमराज्यस्य मुख्यमन्त्रिणा हिमन्त -बिस्वा-सरमाइत्यनेन सामाजिकसञ्चारपटले कृता। श्रीसोरेन: श्रीसरमा इत्यनेन सह नवदिल्लयां केन्द्रीयगृहमन्त्रिणा अमिततशाहेन साकं संवादं कृतवान्। ध्येयं वर्तते यत् साम्प्रतिके समये चम्पईसोरेन: झामुमोइत्यस्य दले अपमानस्य आरोपं ख्यापितवान्।**